
# कर्मकाण्डसंस्कारविज्ञानम्



प्रधानसम्पादकः
प्रो. अर्कनाथचौधरी

सम्पादकः
डॉ. शत्रुघ्नपाणिग्राही

सहसम्पादकः
डॉ. अश्विन का. राजगोरः

Scanned with CamScanner

## कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)


### आयोजकसंस्थाः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

### संरक्षकाः

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः

### प्रकाशकः

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः – ५००
प्रकाशनवर्ष–२०१७
प्राप्तिस्थानम् – सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

### मुद्रणम्ः

**जलाराम ग्राफीक्स अेन्ड ओफसेट**
**परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,**
**अेस टी रोड, वेरावल – ३६२ २६६.**
**फोन : (०२८७६) २२१८६१**


Scanned with CamScanner

# संस्काराणामाधुनिकयुगे महत्त्वम्

प्रो. अर्चना दुब

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।[1]**

भारतीया संस्कृतिः विश्वस्य प्राचीनतमा प्राचीनतमासु वा अन्यतमा संस्कृतिः अस्ति । संस्करणं परिष्करणं चेतस आत्मनो वा संस्कृतिरिति समभिधीयते । सा नाम संस्कृतिर्या व्यपनयति मलं मनसः, चाञ्चल्यं चेतसः, अज्ञानावरणमात्मनश्च । पापापनयनपूर्वकमेषा प्रसादयति स्वान्तम्, दुर्भावदमनपूर्वकं संस्थापयति स्थैर्यं चेतसि, मनःशुद्धिपुरःसरं पावयत्यात्मानपहरति च चित्तभ्रमम् । संस्कृतिः जीवनस्यान्तरङ्गं स्वरूपं प्रकाशयति अस्माकं संस्कृतिः विश्वगुरुगौरवम् अलभतसा एव प्रथमा संस्कृति इति वेदे संस्तूयते – सा प्रथमा संस्कृतिविश्ववारा ।[2]

**सत्याहिंसागुणैः श्रेष्ठा, विश्वबन्धुत्वशिक्षिका ।**

**विश्वशान्तिसुखाधात्री, भारतीया हि संस्कृतिः ।।**

भारतीया संस्कृतिः संस्कारमूला अस्ति । संस्कृतेः प्राणतत्त्वं संस्कारो विद्यते । संस्कारं विना संस्कृति मृतप्राया अस्ति । संस्कारशब्दः समुपसर्गपूर्वकं – कृ धातोः ल्युट् प्रत्यये कृते सति साध्यते । संस्कारेण पदार्थः मनुष्यो वा कस्यापि विशिष्टकार्यकरणस्य योग्यो भवति । संस्कारो हि नाम गुणाधानेन वा स्याद् दोषापनयनेन वा ।[3]

**संस्कारो नाम स भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य ।**

**संस्कारो हि गुणान्तराधानमुच्यते ।[4]**

संस्कारः बाह्याभ्यन्तरमलविशोधकं, व्यक्तित्वविस्फोटकं, प्रज्ञाप्रकर्षकञ्च किमपि विलक्षणं तत्त्वम अस्ति । आर्यसभ्यतायां यद्यत्सारभूतं विलोक्यत व्यवहारजातं तत्र संस्काराख्यं कर्म व्यवहाराणां संकलितरूपं स्वीयां विलक्षणां चमत्कृतिं विधत्ते वैदिकैः । संस्कारैः संस्कृताः पुरूषपुङ्गवा जगतितले ओजोमयं धाम धारयन्तः स्वीयेन यशसा जगत्त्रयं धवलयांचक्रुः ।

### संस्काराणां भेदाः –

संस्काराणां वर्णनं मुख्यतः पारस्करगृह्यसूत्रे प्राप्यते । संस्कारणामनेके भेदाः सन्ति गौतमस्मृतावष्टचत्वारिंशत् भेदा उपदर्शिताः– अष्टचत्वारिंशत् संस्काराः यथा– गर्भाधानं, पुंसवनं, सीमन्तोन्नयनं, जातकर्म, नामकर्म, निष्क्रमणमन्नप्राशनं, चौलोपनयने, चत्वारि वेदव्रतानि, केशान्तस्नाने, सहवर्मा चारिणीसंयोगः । पंचमहायज्ञा, अष्टकाः, पार्वणश्राद्धानि, श्रावण्याग्रहायणी चैत्र्याश्वयुजीति, सप्तपाकसंस्थाः, अग्न्याधेयमग्निहोत्रं, दर्शपौर्णमासौ, चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशु, सौत्रमणीति, सप्तहविर्यज्ञ संस्था, अग्निष्टोमोऽत्याग्निष्टोम, उक्थ्यः, षोडशी, वाजपेयोऽतिरात्रः आप्तोर्याम इति सप्तसोमयज्ञसंस्थाः उपाकर्मोत्सर्जनं पैतृमेधिकं, दया, क्षमा, अनुसूया, शौचम्, अनायासम्, मंगलं, अकार्पण्यं, अस्पृहा, एते अष्टचत्वारिंशत् संस्काराः उक्ताः । व्यासस्मृतौ षोडशसंस्काराः कथिताः –

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।**

**नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ।**


**कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ।।**

**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ।**

**त्रेताग्निसङ्ग्रऽहश्चेति संस्काराः षोडशस्मृताः ।।**



Scanned with CamScanner




अङ्गिरसः मते पञ्चविंशतिः संस्काराः सन्ति ।[७] महर्षिगौतमेन दर्शिताष्टचत्वारिंशत्संस्कारेषु विशेषेणातिशयधानरूपा संस्काराः वर्तन्ते । चत्वारिंशत् संस्काराः अष्टौ आत्मगुणाः ।[८]

बृहदारण्यकोपनिषदपि कथयति सन्तत्याः मेधावित्वमपेक्ष्यते तु षोडशसंस्काराः करणीयाः नवाजातस्य । यावत् खलु भारतीयाः संस्कारसंस्कृताः अतिष्ठन्–तावत् देशोऽयं विश्वगुरुरेवासीत् । संस्कारैः संस्कृताः विद्वांसः देशाय प्रदत्ताः । दिलीप–रघुरसद्दशाः शक्तिशालिनः वीरपुरुषा अपि दत्ताः ।

मुख्यसंस्काराः प्रायेण षोडशसंख्यकाः । तेषां नामानि यथा– (१) गर्भाधानम्, (२) पुंसवनम्, (३) सीमन्तोन्नयनम्, (४) जातकर्म, (५) नामकरणम्, (६) निष्क्रमणम्, (७) अन्नप्राशनम्, (८) चूडाकर्म, (९) कर्णवेधः, (१०) उपनयनम्, (११) वेदारम्भः, (१२) समावर्तनम्, (१३) विवाहः (१४) वानप्रस्थः (१५) संन्यासः (१६) अन्त्येष्टिः । ऋग्वेदे षोडशसंस्काराणां फलानि पृथग्–पृथग् सन्ति ।[९]



Scanned with CamScanner

| संस्काराः | फलानि |
|---|---|
| १. गर्भाधानम् | १. बीजजन्यस्य गर्भवासजन्यस्य च मालिन्यस्य सन्तानोतपत्तेपरमार्जनम् – स्त्रीणां क्षेत्रपाणां शुद्धिः |
| २. पुंसवनम् । | २. भाविजातकस्य कृते पुंस्त्वप्रतिपादनम् |
| ३. सीमन्तोन्नयनम् | ३. गर्भाधानवत् । |
| ४. जातकर्म | ४. गर्भाम्बुपानजन्यदोषनिष्कासनं तैजसत्वमायुर्वृद्धिश्च |
| ५. नामकर्म | ५. व्यवहारसिद्धिः |
| ६. निष्क्रमणम् | ६. सूर्यावलोकनेनायुर्वृद्धिः: श्रीवृद्धिश्च । |
| ७. अन्नप्राशनम् | ७. मातुः गर्भे मलभक्षणदोषस्यापमार्जनम् । |
| ८. चूडाकर्म | ८. बलमायुस्तैजसत्वमानयनम् । |
| ९. उपनयनम् | ९. द्विजत्वासिद्धिपूर्वकवेदाध्ययनाधिकारित्वम् । |
| १०. अग्निहोत्रादिः | १०. स्वर्गः स्पष्टं फलम् । |
| ११. विवाहः | ११. पितृतारकपुत्रोत्पत्तिः । |

**(१) गर्भाधानम् :**

"गर्भास्याधानं वीर्यस्थापनं स्थिरीकरणं यस्मिन् येन वा कर्मणा तद् गर्भाधानम् ।" एतेषां मन्त्राणामुच्चारेण मातृजठरे बालकस्य बालिकाया वा अन्नमय–प्राणमयकोशनिर्मितिः प्रारभते । जीवनोद्देश्यं ध्यानम्, स्वोच्चादर्शान् संस्मरन् युगलं सन्ततिमुत्पादयेत् । एष एव लक्ष्यः संस्कारस्यास्य । अस्मिन् काले पठनीयमन्त्रः ।

**गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।**
**गर्भंतेऽश्विनौ देवावाधत्तां पुष्करश्रजौ ।।**[१०]
**वैदिक कर्मभिः पुष्पैनिषेकादिर्द्विजन्मनाम् ।**
**कार्यः शरीरः संस्कार पावनः प्रेत्य चेह च ।।**[११]

**(२) पुंसवनम् – संस्कारः :**

**"पूमान् सूयते यस्मात् इति पुंसवनम्"** गर्भरक्षार्यैः एष संस्कारः क्रियते गर्भाधानात्–तृतीये मासे । संस्कारेऽस्मिन् पितरौ प्रतिज्ञां कुरुतः यत् किमपि तादृक् कार्यं न करिष्यावः येन गर्भच्युतिभयं भवेत् । एवं खलु भोगवादिप्रवृत्तिरत्र नियन्त्र्यते ।

**हिरण्यगर्भः समवर्तताग्रे, भूतस्य जातः पतिरेक आसीत् ।**
**सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।**[१२]



Scanned with CamScanner

(३) सीमन्तोन्नयन–संस्कारः :

"चतुर्थे गर्भमासे वा सीमन्तोन्नयनम् ।" संस्कारोऽयं गर्भस्थशिशोः कृते क्रियते । गर्भाधानात् सप्तममासे संस्कारो बालकस्य मानसिकवृद्धयर्थं क्रियते । अस्मिन् तेषां मन्त्राणामुच्चारणं क्रियते येषां स्पन्दनेन मातुर्दुष्प्रभावात् संरक्षणं स्यात् एभिस्त्रिभिः संस्कारैः मातुः पुत्रस्य च पुष्टिर्भवति । मंत्राणां स्पन्दनेन च बालकः वृद्धिं प्राप्नोति ।

सोम एव नो राजेमा मानुषीः प्रजाः ।

अविमुक्त–चक्र आसीरंस्तीरे तुभ्यमसौ ।।[१३]

(४) जातकर्म–संस्कारः :

संस्कारेऽस्मिन् नवजातशिशोः मातुः गर्भात् बहिरागमनं भवति । **"गर्भाम्बुपानजो दोषो जातात्सर्वो विनश्यति ।"** सोष्यन्तीमद्भिरभ्युक्षति । संस्कारः एषस्तु जातकस्य जन्मपश्चात् क्रियते । अनेन पिता नवजातशिशोः आवाहनं स्वागतं करोति, तस्य दीर्घायुष्यतीव्रबुद्धिस्वस्थसुन्दरजीवनस्य कामनां करोति स्वर्णशलाकया वा मधु ददाति । टिटनेश इति आधुनिकविज्ञानस्य समीपं विद्यते ।

जातकर्मसंस्कारस्य समये पठनीयः मंत्रः–

यथायं वायुरेजति यथा समुद्रऽएजति ।

एवायं दशमास्योऽअस्रज्जरायुणा सह ।।

अश्मा भव परशुर्भव हिरण्यमश्रुतं भव ।

आत्मा वै पुत्रनामासि सजीवः शरदः शतम् ।।[१४]

(५) नामकरण–संस्कारः

नाम्नः सम्बन्धः मानवस्य जन्मतः मृत्योः पश्चात् अस्ति । नाम्नः सम्बन्धः आत्मना सह वर्त्तते ।

अंगादंगात्संभवसि हृदयादधि जायसे ।

आत्मा वै पुत्र नामासि सजीवः शरदः शतम् ।।

संस्कारोऽयं शिशोरागमनात् एकादश दिवसे क्रियते। आश्वलायनगोभिलषिभ्यां स्वकीयगृह्यसूत्रयोः संस्कारस्यास्य विधिः सम्यक्तया प्रतिपादिता । मनुस्मृतावापि लिखितम् "नामानि सुन्दराणि शुभानि च स्युः ।" स्त्रीणां नामान्यपि कोमलानि शुभानि च भवेयुः ।

(६) निष्क्रमण–संस्कारः

दिनकर–दर्शनं निष्क्रमण–संस्कारे भवति । वैज्ञानिकदृष्ट्या दिनकर–दर्शनेन "विटामिन डी (D)" प्राप्त्यर्थ तथा च असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मा अमृतं गमय इति भावो विद्यते ।



Scanned with CamScanner

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुचरत् ।

पश्येम शरदः शतं जीवेम शरदः शतम् ॥

श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शत-

मदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥[१५]

"चतुर्थमासे निष्क्रमणम् । सूर्यमुदीक्षयति तच्चक्षुरिति ।" संस्कारस्यास्य निष्पादनं चतुर्थे मासे जन्मदिवसकाले-एव क्रियते । अनेन संस्कारेण बालकः जगतः बाह्यरूपमवलोकयति ।

**(७) अन्नप्राशन-संस्कारः**

शिशोः शारीरिकवृद्धयर्थं केवलं दुग्धं पर्याप्तं नास्ति । आयुवर्द्धनेन अन्नस्य महती आवश्यकता भवति ।

**अन्नपतेऽन्नस्यनो देह्यनमीवस्य शुष्मिणः ।**

**प्रप्रदातारं तारिषऊर्जनो धेहि द्विपदे चतुष्पदे ॥**

पुत्रस्य षष्ठेऽष्टमे वा मासे तथा पुत्र्याः पंचमे सप्तमे च मासे संस्कारोऽयं विधीयते । अत्राश्वलायनगृह्यसूत्रं वदति । षष्ठे मास्यन्नप्राशनम् घृतोदनैः तेजस्कामः दधिमधुघृतमिश्रितमन्नं प्राशायेत् ।[१७]

**(८) कर्णवेध-संस्कारः**

"कर्णवेधो वर्षे तृतीये पञ्चमे वा ।"[१८] एषः संस्कारः स्वास्थ्यदृष्ट्या महत्त्वपूर्णोऽस्ति । चिकित्साविज्ञानदृष्ट्या "हाइड्रोसील' नाम्नः रोगात् मुक्तिः भवति । यदि कोऽपि विशेषज्ञ चिकित्सिकः कर्णयोः शिरां सम्पक्प्रकारेण छिन्नं (छिद्रं) करोति तर्हि उक्तरोगो न भवति ।

**भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।**

**स्थिरैरंगैस्तुष्टुवांशस्तनूभिर्व्यसेमहि देवहितं यदायुः ॥**

एष संस्कारः कन्यायाः पंचमे सप्तम वा वर्षे क्रियते । बालकानामपि कर्णवेधसंस्कारो भवति । अनेन शारीरिकविकासो भवति रोगोन्मूलनं च जायते । एवं तेन सह कर्णच्छेदनने बालकस्य बलिरपि न कर्त्तुं शक्यते । बालः कल्याणकारी वार्त्ता एव शृणोति ।

**(९) चूडाकर्म-संस्कारः**

शिरसः ज्ञानकेन्द्रस्य स्थले चूडा-रक्षणम् आवश्यकमस्ति । वारमेकं मुण्डनमावश्यकमस्ति चर्मरोगो न भवति । तृतीये वर्षे वा चौलम् । "बालायुर्वचो वृद्धिश्च चूडाकर्मफलं स्मृतम् ।" गृह्यसूत्रानुसारं चूडाकर्मसंस्कारः प्रथमे तृतीय वा वर्षे भवति । पंचमे सप्तमे वा वर्षेऽपि क्षत्रियवैश्याः संस्कारमिमं कुर्वन्ति । अधुना मुण्डनसंस्कारेण प्रचलितो विद्यते ।

**येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।**

**तेन ब्राह्मणो वपतेदमस्यायुष्यं जरदष्टिर्यथासम् ॥[२०]**

Scanned with CamScanner

(१०) विद्यारम्भ–संस्कारः

बालकस्य अक्षरारम्भक्रिया धरायां क्रोडे भवति यतोहि बालकाय मृत्तिकया क्रीडाकरणमतितरां रोचते । उक्तञ्च माताभूमिः पुत्रोऽहं पृथिव्याः । सर्वप्रथमं विघ्नहर्त्ता बुद्धिप्रदाता च गणेशस्यार्चना भवति ।

**गणानान्त्वागणपति ँहवामहे प्रियाणान्त्वा प्रियपति ँ हवामहे**

**निधीनान्त्वा निधिपति ँ हवामहे वसो मम ।।**

**आहमजानि गब्भर्धमात्वमजासि गब्भर्धम् ।।**

तदनन्तरं विद्याधिष्ठात्रीसरस्वतीं प्रति स्वकीयः भावाञ्जलिः प्रदीयते–

**पावका नः सरस्वती वाजेभिर्वाजिनीवती ।**

**यज्ञं वष्टु धिया वसुः ।।**[22]

(११) उपनयन–सस्कारः

उपनयनम् अर्थात् उप उपसर्गं कृत्वा नयनम् इत्यस्यार्थोऽस्ति नीयते अनेन इति नयनम् अर्थात् येन संस्कारेण संस्कृता व्यक्तिः नीयते । अन्यच्च नयनशब्दस्यार्थोऽस्ति नेत्रम् प्रकृतिप्रदत्तं नयनन्तु सर्वेषां जनानां भवति परन्तु अनेन संस्कारेण ज्ञानरूपनेत्रस्य प्रकटनं भवति । इदं ज्ञानचक्षु–चर्मचक्षुषः समीपमेव तिष्ठति, यस्य स्थानं शास्त्रेषु भ्रुवोः मध्येऽस्ति । नयनशब्दस्य रुढार्थं न मत्वा यदि व्यत्पत्तिलब्धार्थं स्वीकृत्यः गुरोः पार्श्वे ज्ञानार्जनार्थं बालकः गच्छति ।

**उपनीयगुरुः शिष्यं महाव्याहृति पूर्वकम् ।**

**वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ।।**

उपनयनसंस्कारस्य नाना विधयः सन्ति । उपनयनसंस्कारो यज्ञोपवीतसंस्कारोऽपि कथ्यते । उपनयनसंस्कारस्य अपरं नाम यज्ञोपवीतसंस्कारोऽपि अस्ति (नाम्ना अभिधीयते) यज्ञोपवीतं–एकेन विशेषेण सूत्रेण निर्मितं भवति, यं (यज्ञोपवीतं) व्यावहारिकभाषायां जनेऊ इति नाम्ना अभिधीयते । संस्कारेऽस्मिन् बालकस्य यज्ञोपवीतेन सह धार्य–धारक–भावसम्बन्धो भवति ।

एकः प्रश्नोऽस्ति यत् यज्ञोपवीतधारणायाः पृष्ठे रहस्यं किम् ? महर्षयस्तु यज्ञोपवीतस्य महत्त्वं स्वीकुर्वन्ति ।

**यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।**

**आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।।**

सम्प्रत्येव इटली इत्यस्मिन् एको वैज्ञानिकशोधः सम्पन्नोऽभवत्, यस्मिन् यज्ञोपवीतस्य महत्त्वस्योपरि अनुसन्धानं सञ्जातं ।

यज्ञोपवीतं ग्रहणकर्ता शरीरस्य स्वाभाविकशौचादिकरणार्थे स्वकीयं कर्णस्योपरि यज्ञोपवीतं दृढतया बन्धाति यस्य प्रभावः साक्षात् हृदययोगस्योपरि परिलक्षितो भवति । कर्णस्य पार्श्वे कृशा शिरा भवति, यदि तस्यां (शिरा) यज्ञोपवीतेन बन्धनं जायते तर्हि हृदयप्रदेशस्य अवयवं प्रभावितं जायते तथा अस्य (हृदय–रोगस्य) प्रभावोऽपि अस्ति यत् शक्तिक्षयस्य रोगोऽस्ति साऽपि दूरं गच्छति ।



Scanned with CamScanner

दैनन्दिनजीवने प्रदूषणस्य बहुप्रकोपो दरीदृश्यते । अनेन प्रकोपेणापि यज्ञोपवीतधारणेन मुक्तिः प्राप्यते । शङ्का सञ्जायते कथं केन प्रकारेण वा?

शङ्कायाअस्याः समाधानमस्ति यज्ञोपवीतं कर्णस्योपरि बन्धनात् पश्चात् बहिर्निष्करणाय व्यक्तिः निश्चितरूपेण स्वकीयं हस्तं प्रक्षालयति । इत्थं वारंवारं हस्तप्रक्षालनेन प्रदूषणस्य तथा च कीटाणु इत्यस्य प्रसारोऽवरुद्ध्यते ।

उपनयनसंस्कारे शिशोः केशानां प्रथमं क्षुरेण इत्यनेन कर्त्तनं भवति । ध्यातव्यमस्ति यत् यत्र शिखायाः स्थलं भवति, तत्र मस्तिष्कस्य ज्ञान–केन्द्रं भवति, यस्मात् कारणात् केशानाम् एकः समूहः सततं शीतलतां प्रददाति । फलस्वरुपं ज्ञानकेन्द्रस्य ज्ञानकेन्द्रितं भवति, ज्ञानकेन्द्रस्य क्रियाशीलता च वृद्धिं प्राप्नोति ।

इत्थं यज्ञोपवीतसंस्कारस्य उपनयनसंस्कारस्य वा शारीरिकमानसिकवैज्ञानिकदृष्ट्या महत्त्वं तु अस्त्येव व्यक्तित्वनिर्माणेऽपि वैशिष्ट्यमस्ति ।

**यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् पुरस्तात् ।**

**आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।।**

एषु च ब्रह्मग्रन्थिर्भवति त्रिषु सूत्रेषु । त्रिसूत्रमिदं ईश्वरीयतत्त्वस्य सच्चिदानन्दरूपस्य, प्रकृतितत्त्वस्य सत्व–रजस्–तमे–गुण–समूहस्य, त्रिमूर्तस्य ज्ञानेच्छाक्रियारूपस्य, त्रिलोकस्य भूःभुवःस्वः स्वरूपस्य प्रतीकभूतम् भवति । अनेन जीवः यज्ञोपवीतधारणानन्तरमेव मनोवाक्कायेषु संयमनशक्तिप्रेरणां प्राप्नोति । अस्मादेव कालात् च स ब्रह्मचर्यस्य सदाचारस्य च व्रतग्रहणं कुरुते । गायत्रीमन्त्रो गायत्रीछन्दसि विद्यते ।

**ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।**

**धियो यो न : प्रचोदयात् ।**

## (१२) वेदारम्भ– संस्कारः

वेदा ज्ञानराशित्वात् शाश्वतस्थायिनः, ज्ञाननिधयः, मनुज–कर्त्तव्यबोधका इति विविधात्वर्थग्रहणाद् ज्ञायते । वेदोऽलिखो धर्ममूलम् । अस्मिन् संस्कारे वेदानामध्ययनं भवन्ति । वेदाः आचारसंहितारूपेण मानवजीवनस्यादर्शदिशां निर्दिशन्ति ।

**इषे त्त्वोर्ज्वे त्वा वायवस्थदेवो वः सविता प्रार्पयतु**

**श्रेष्ठतमायकर्मणऽआप्यायध्वमध्न्याऽइन्द्राय भागं**

**प्रजावतीरनमीवाऽअयक्ष्मा मा वस्तेनऽईशतमाघस**

**सोध्रुवाऽस्मिन् गोपतौ स्यातवह्वीर्यजमानस्य पशून्पाहि ।।**

**आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायता मा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्योऽनऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।**



Scanned with CamScanner

उपर्युक्तराष्ट्रमन्त्रे सर्वकल्याणस्य कामना कृता । भारतीयसंस्कृते अद्वितीयं वैशिष्ट्यमस्ति – सर्वे भवन्तु सुखिनः । भारतीयायाः संस्कृतेर्मूलरूपं वेदेष्वेवोपलभ्यते ।

**(१३) केशान्त–संस्कारः**

गोदानमपि संस्कारेऽस्मिन् क्रियते । अस्य संस्कारस्य पृष्ठतः दानस्य महत्त्वमपि अस्ति तेन सह केशश्मश्रुकर्त्तनमस्ति एव ।

**यच्छुरेण मज्जयता सुपेशसा वप्त्वा वा वपति ।**

**केशाञ्छिन्धि शिरोमाऽस्यायुः प्रमोषीः ।।**

मानवशरीरस्यामन्तिमोऽस्ति संस्कारः । अस्योत्तरदायित्वं परिवारजनस्योपरि तथा च पुत्र–पौत्रस्योपरि भवति ।

**वायुरनिलममृतमथेदंभस्मान्त शरीरम् ।**

**ॐ३ क्रतो स्मर । क्लिबे स्मर । कृत मर ।।**

एतेषां संस्काराणां वैज्ञानिकदृष्ट्याऽपि महत्त्वमस्ति । भारतीयजीवने जीवस्य शोधनाय षोडषसंस्कारपरम्परा आवश्यकरूपेण प्रचलिता अस्ति । संस्कारस्य फलं केवलं लौकिकं नास्ति अपितु पारलौकिकमपि अस्ति । संस्कारेषु आध्यात्मिक–वैज्ञानिकयोगस्य मणिकाञ्चनयोगो दृश्यते ।

**संस्कारैः संस्कृतः पूर्वैरुत्तरैरनुसंस्कृतः ।**

**नित्यमष्टगुणैर्यक्तौ ब्राह्मणो ब्राह्मलौकिकः ।।**

**ब्राह्मं पदमवाप्नोति यस्मान्नच्यवते पुनः ।**

षोडशसंस्कारपरम्परा तु यद्यपि यत्र तत्र भारते द्रष्टुं शक्यते । अधुनापि लोकेः संस्कारस्योपादेयता ज्ञातव्या जीवने च सा पुनः स्थापनीया । एतैः विशिष्टैः संस्कारै विराजमाना इयम् भारतीयसंस्कृतिः मानवसंस्कृतेः एकम् असाधारणम् प्रमुखम् रूपम् दधती सती जगति प्रकाशमाना वर्त्तते । विश्वसंस्कृतौ च तस्याः अपूर्वम् योगदानम् अस्ति । भारतीयानां संस्कारैस्तत्रत्या सभ्यता संस्कृतिश्च नितान्तं प्रभाविते संजाते । यत्र पूर्वं केवलमीसाई–धर्मानुयायिनो यहूदीधर्मावलम्बिनश्च अदृश्यन्त तत्र भारतीयानां गमनानन्तरं हिन्दूजैनसिखईसलाम धर्मानुयायिनोऽपि प्रभावशालिरूपेण दृष्टिपथमाययुः । संस्कारं विना संस्कृत्या अङ्कुराः पुष्पिताः फलिताश्च न भवन्ति ।

पारे समुद्रं गत्वा नवीनां स्थितिं यथात्मसादकार्षुस्तेन तैः संसूचितं यद् भारतीयाः स्वकीयं पुरातनं सांस्कृतिकमल्यमपरित्यजन्तो नवीनैः परिवर्तनैः सामञ्जस्यसंस्थापने पूर्णरूपेण समर्थाः सन्ति । वस्तुतो भगवता भारतभूमौं समयेसमये स्वयमवतीर्यास्याः समधिकं महत्त्वं संस्थापितम् । अत एव देवा अपि भारते जन्म ग्रहीतुं सोत्सुकाः संलक्ष्यन्ते ।

गायन्ति देवाः किल गीतकानि

धन्यास्तु ते भारतभूमिभागः ।।



Scanned with CamScanner

# गोत्वं तस्याः यज्ञे योगदानम्

डॉ. कृष्णप्रसाद निरौला

यज्ञसम्पादने गोर्महत्त्वं वर्तते । गोर्भावो गोत्वम् । अव्याप्त्यतिव्याप्त्यसम्भवदोषत्रयशून्यं गोर्लक्षणं तु सास्नादिमत्वं सा गलकम्बलवत्त्वमिति लक्षणं प्रयोजनं तु इतरभेदज्ञानं वा व्यवहारः । व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमित्युक्तेः ।

चतुष्पदादिषु प्राणिषु गौः इतरेभ्यो भिद्यते । अर्थात् गौर्न पशुः न च प्राणिरूपा अपि च देवरूपैव । गलकम्बलवत्त्वलक्षणात् महिषी, आश्वी, नीलादिषु नातिव्याप्तिदोषः । तत्र गलकम्बलवत्त्वलक्षणाभावान्नैव गोत्वम् ।

'गावो विश्वस्य मातरः'[1] सर्वे देवाः स्थिता देहे सर्वदेवमयी हि गौः ॥

कालिदासेन रघुवंशमहाकाव्ये मुनिहोमधेनुरित्युक्त्वा यज्ञसम्पादनाय यथा ब्राह्मणानां वेदमन्त्राणाम् अग्रेश्च महत्त्वं (प्राधान्यम्) तथैव गवामपि महत्त्वं वर्तते इति सूचितम् । मुनेः वशिष्ठस्य होमाय–होमकर्मणे यज्ञाय यज्ञसम्पादनाय धेनुः । धेनुर्नन्दिनीप्रसूता धेनुः । यज्ञकर्मणि गवा सह पञ्चगव्यस्य पञ्चामृतस्य आवश्यकम् यज्ञारम्भे एव प्रायश्चित्तार्थं गोदानं क्रियते । इदानीं तु गोः निष्क्रयभूतं किञ्चिद् हिरण्यं तन्निष्क्रयभूतं किञ्चिद्द्रव्याणीति उक्त्वा रूप्यकमेव दीयते । तन्नगोदानम् । यज्ञस्थलशुद्ध्यर्थं पञ्चगव्यस्य यागे महत्त्वम् ।

यज्ञस्थलशुद्ध्यर्थं च यथा मन्त्राः –

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।

यज्ञस्थलविशुद्ध्यर्थं पञ्चगव्यं करोम्यहम् ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।

एकरात्रोपवासश्च कृच्छ्रं सान्तापनं स्मृतम् । मनु. ११–२१२ ॥

गोर्विकारो गव्यम् । पञ्चानां गव्यानां समाहारः (समूहः) पञ्चगव्यम् । पञ्चगव्यैः सह कुशोदकं च एकीकृत्य वेदमन्त्रैः अभिमन्त्रितं क्रियते यथा चोक्तम् –

गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।

आप्यायस्वेति क्षीरं दधि क्राव्णोति वै दधि ।

तेजोऽसीत्यादि सर्पिः देवस्यत्वा कुशोदकम् ॥

अनेन प्रकारेण वेदमन्त्रैः पञ्चगव्यस्य संस्कारं कृत्वा यज्ञस्थलस्य शुद्धिः क्रियते । तथा पञ्चगव्यस्य प्राशनं च क्रियते । पञ्चगव्यप्राशनस्य मन्त्रोऽयम्–

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।

प्राशनात् पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥

मन्त्रस्यायमर्थः – अस्थिगतं मज्जामध्येस्थितं वा पापं यत् मम देहे वर्तते तत्पापं पञ्चगव्यस्य पानात् अग्निः यथा इन्धनं दहति तथा दहतु । अत्र अस्थिगतं पापं तु क्षयरोगः एव । नित्य पञ्चगव्यस्य प्राशनात् क्षयरोगोऽपि नश्यति

इति वैद्याः वदन्ति । इदानीं महता प्रमाणेन संशोधनं जायमानं वर्तते । गोमुत्रे गोमयेन च शताधिकाः रोगाः नश्यन्ति इति वैश्विकीयक्षेत्रे सर्वविदितमेव । आर्युवेदोपचारे गोमयस्य विकारं कृत्वा गुटिकां विधाय औषधरूपेण दीयते । अग्निरूपायनविधौ यज्ञस्थले पञ्चभूसंस्काराः भवन्ति तत्र गोमयेन उपलिप्य इति दृढीकरणार्थम् ।

गोमयेन ऊर्जायाः विद्युत - उत्पत्तिश्च जायते । अतः पञ्चगव्यस्य केवलं यज्ञे एव न महत्त्वं जीवनेऽपि स्वास्थ्यमयजीवनाय अपि महत्त्वं वर्तते । **'लक्ष्मीश्च गोमये नित्यं पवित्रा सर्वमङ्गला'** - इति महाभारते ।

पञ्चामृतं -

**पयो दधि घृतं चैव मधु च शर्करान्वीतम् ।**

**पञ्चामृतं मया नीतं स्नानार्थं प्रतिगृह्यताम् ।।**

अत्र पञ्चामृते पयः दधि घृतमिति त्रीणि गव्यानि एव सन्ति । न म्रियते अस्माद् इति अमृतम् शरीरस्यपोषककरणाद् दीर्घायुष्यमपि जायते । 'ओषधिषु पयो दिव्यम्' - यजुः । औषधिषु दुग्धं उत्तमम् औषधं वर्तते । दध्ना शर्करया च शरीरस्य धातूनां शुद्धिर्भवति । मलविशुद्धिरपि सर्वेषामनुभवगोचर एवेति । पञ्चामृतेषु घृतं तु आयुवर्धकमिति शास्त्रकारैः स्वीकृतं वर्तते । घृतं वै अग्निः आयुर्वै घृतम् । आयुरेवेति घृते आयुषः आरोपो दृश्यते । छान्दोग्ये ६ - अध्याये ६ - खण्डे उक्तं भक्षितं तेजः (घृतम्) तद्धि वाग् भवति । तन्मनः तद्धि बुद्धिः घृतम् आज्यम् इत्युच्यते । आ समन्ताद् यजनं येन तद् आज्यम् । सम्पूर्णरूपेण होमरूपं यजनं घृतेन अतः आज्यम् । घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वहा । यजुर्वेदः - ६.१९

यज्ञादेव दधिघृतं च उत्पन्नमिति श्रूयते शुक्लयुर्वेदीय पुरुषसूक्ते यथा-

**तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।। यजुर्वेद पुरुषसुक्तम् - ८**

यज्ञे सर्वप्रकारेण समर्पितात् पदार्थात् पृषद् दधि तत् सहितम् आज्यं घृतम् अभवत् इत्यर्थः ।

सर्वेषु यज्ञसम्पादनपदार्थेषु आज्यं खलु अग्निदीपन हेतुत्वात् छ्रधानं वर्तते । पूर्णाहूतौ आज्यस्य धारा क्रियते मन्त्रश्च यथा-

घृतस्य धारा अभिचाकशीतिहिरण्ययो वेतसो मध्य आसाम् - यजुर्वेदः ।

यज्ञशब्दः देव-पूजा-संगितकरण-दानेषु अर्थेषु विद्यमानाद् यज् धातोः यज्ञशब्दः समुत्पद्यते । अतः दानं विना यज्ञः सम्पन्नो न भवति । मनुवदति-

त्रीण्याहुरिति-दानानि गावः पृथ्वी -सरस्वती ।

अत्र गावः प्रथमं नाम गोदानस्य महत्त्वं त्रिष्वपि सूचितं भवति । गोः पुच्छे गंगा निवसतीति मत्वा गोपुच्छं गृहीत्वा संकल्पो विधीयते १। गोपुच्छेन च अभिषेकः क्रियते । इति शम् ।

प्राचार्यः (Rtd.)

ब्रह्मर्षिसंस्कृतमहाविद्यालयः

नड़ियाद-३८७००१



Scanned with CamScanner